**DEPARTMENT OF SANSKRIT-SAHITYA**

**KUMAR BHASKAR VARMMA SANSKRIT AND ANCIENT STUDIES UNIVERSITY**


**NAMATI::NALBARI::-781337,ASSAM**

# प्रतिवेदनम्

असमसर्वकारस्य निर्देशानुसारेण प्रतिवर्षं मार्चमासस्य 31 दिनाङ्के उपेन्द्रनाथब्रह्मणः जन्मदिवसः छात्रदिवसरूपेण परिगण्यते । छात्रदिवसोत्सवः राज्यस्य सर्वासु शिक्षणसंस्थासु आयोज्यते । कुमारभास्करवर्मसंस्कृतपुरातनाध्यनविश्वविद्यालये २०२४ तमे वर्षे एप्रिलमासस्य प्रथमदिवसे संस्कृतसाहित्यविभागपक्षतः अपराह्णत्रिवादने छात्रदिवसोत्सवः समायोजितः । अनुष्ठानेऽस्मिन् विश्वविद्यालयस्य संस्कृतसाहित्यविभागस्य विभागाध्यक्षा डा०निवेदिता गोच्छामी महोदया, डा०रातुलबुजरबरुवामहाभागाः, डा० कमललोचनआत्रेयवर्याः, डा० नुरिमायास्मिनमहोदया, डा० देवव्रतवाड़ाइवर्याः, डा० छविलालउपाध्यायवर्याः विराजमानाः आसन् । ततः विश्वविद्यालयस्य संकृतसाहित्यविभागस्य आचार्यः डा० रातुलबुजरबरुवा महोदयः दीपप्रज्वालनेन उद्बोधनं कृतवान् । उपस्थिताः आचार्याः छात्राः च समग्रे असमराज्ये आयोजितस्य छात्रदिवसाख्यस्य कार्यक्रमस्यास्य प्रासङ्गिकत्वं उपस्थापयन्ति । तदनु उपेन्द्रनाथब्रह्ममहोदयस्य बोडोसमाजस्य उत्कर्षस्य कृते यत् योगदानं तत्सर्वमपि आलोचितम् । देशस्य हिताय छात्राणां कर्तव्यानि अपि समुपदिष्टानि ।

कार्यक्रमे विभागीयाः सर्वे अध्यापकाः शोधच्छात्राः स्नातक-स्नातकोत्तरच्छात्राश्च समुपस्थिता आसन् ।




दीपप्रज्वालनम्








अनुष्ठानस्यास्य छायाचित्राणि